पलम्भादनेनैव सकलजगज्जननोत्पत्तावितरवैयर्थ्यञ्च । तदु
क्तं वीतरागस्तुतौ "कर्त्तास्ति नित्यो जगतः स चैकः
स सर्व्वगः सन् स्ववशः स सत्यः । इमाः कुहेवाः
कुविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वमिति" ॥
अन्यत्रापि । "कर्त्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः । कार्य्यं किमत्र
भवतापि च तक्षकाद्यैराहत्य च त्रिभुवनं पुरुषं करोतीति"
तस्मात् प्रागुक्तकारणत्रितयबलादावरणप्रक्षये सार्व्वज्ञ्यं
युक्तम् । न चाप्तोपदेशान्तराभावात् सम्यग्दर्शनादित्रित-
यानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वाद-
'मुष्याशेषार्थज्ञानस्य । नचान्योन्याश्रयतादिदोषः आगमस-
र्व्वज्ञपरम्पराया वीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम् ।
रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितय-
मर्हत्प्रवचनसङ्ग्रहपरे परमागमसारे प्ररूपितं "सम्यग्दर्शन-
ज्ञानचारित्राणि मोक्षमार्ग" इति । विवृतञ्च योगदेवेन
"येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपा-
दिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्य्यायं श्रद्धानं
सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रम्, "तत्त्वार्थं श्रद्धानं सम्यग्-
दर्शनमिति"। अन्यदपि "रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धा-
नमुच्यते । जायते तन्निसर्गेण गुरोरधिगमेन वेति" ॥
परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः" व्याख्यानादिरूप-
परोपदेशजनितं ज्ञानमधिगमः । येन स्वभावेन जीवादयः
पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेना-
वगमः सम्यग्ज्ञानम् । यथोक्तम् "यथावस्थिततत्त्वानां संक्षे-
पाद्विस्तरेण वा । योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनी-
षिण" इति ॥ तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्याय-
केवलभेदेन । तदुक्तम् "मतिश्रुतावधिमनःपर्य्यायकेवलानि
ज्ञानमिति"। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रिय-
मनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते सा मतिः ।
ज्ञानवरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम् ।
असम्यग्दर्शनादिगणजनितक्षयोपशमनिमित्तम् अवच्छिन्न-
विषयं ज्ञानमवधिः । ईर्ष्यान्तरायज्ञानावरणक्षयोपशमे
सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनः
पर्य्यायः । तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्-
ज्ञानमन्यज्ञानासंस्पृष्टं केवलम् । तत्राद्यं परोक्षं प्रत्यक्ष-
मन्यत्। तदुक्तम् 'विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम्
प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति"॥ अन्तर्गणि-

कभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः । संसरणकर्म्मोच्छि-
त्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रिया-
निवृत्तिः सम्यक् चारित्रम् । तदेतत् सप्रपञ्चमुक्तमर्हता
"सर्व्वथाऽवद्ययोगानां त्यागश्चारित्रमुच्यते । कीर्त्तितं
तदहिंसादिव्रतभेदेन पञ्चधा । अहिंसासूनृतास्तेय
ब्रह्मचर्य्यापरिग्रहाः ॥ न यत्प्रमादयोगेन जीवित-
व्यपरोपणम् । चराणां स्थावराणाञ्च तदहिंसाव्रतं
मतम् ॥ प्रियं पथ्यवचस्तथ्यं सूनृतव्रतमुच्यते । तत्त-
थ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत् ॥ अनादानमद-
त्तस्यास्तेयव्रतमुदीरितम् । बाह्याः प्राणान्नृणामर्थो
हरता तं हता हि ते ॥ दिव्यौदारिककामानां कृता-
नुमतकारितः । मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा
मतम् ॥ सर्व्वभावेषु मूर्च्छायास्त्यागःस्यादपरिग्रहः ।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥ भावनाभि-
र्भावितानि पञ्चभिः पञ्चधा क्रमात् । महाव्रतानि लोकस्य
साधयन्त्यव्ययं पदमिति"॥ भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्
"हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।आलोच्य भाषणे-
नापि भावयेत् सूनृतं व्रत"मित्यादिना॥ एतानि सम्यग्द-
र्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं
यथा रसायनज्ञानं श्रद्धानाचरणानि सम्भूय रसायनफलं
साधयन्ति न प्रत्येकम् । अत्र संक्षेपतस्तावज्जीवाजीवाख्ये
द्वे तत्त्वे स्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः ।
तदुक्तं पद्मनन्दिना "चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः ॥ हेयं हि कर्त्तृरागा-
दि तत् कार्य्यमविवेकिनः । उपादेयं परं ज्योतिरुप-
योगैकलक्षणमिति" ॥ सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणस्य
ज्ञानदर्शने उपयोगः स परस्परप्रदेशात्तु प्रदेशबन्धात् कर्म्म-
णैकीभूतस्यात्मनोऽन्यत्वप्रतिपत्तिकारणं भवति । सकल-
जीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमवशादौपशमिक-
क्षयात्मकक्षयौपशमिकभावेन कर्म्मोदयवशात् कलुषान्या-
कारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति
यदवोचद्वाचकाचार्य्यः "औपशमिकक्षायिकौ भावौ मिश्रश्च
जीवस्य सत्त्वमौदयिकपारिणामिकौ चेति" । अनुदयप्रा-
प्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानो भावः
औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादिद्रव्यस-
म्बन्धादधः पतिते जलस्य स्वच्छता । कर्म्मणः क्षयोपशमे
सति जायमानो भावः क्षायिकः यथा मोक्षः । उभयात्म